# ॥ वैयाकरणसिद्धान्तकौमुदी ॥

## अच्सन्धिप्रकरणम् (१)

११.०८.२०१०

# सन्धिः

- पाणिनिना नोपयुक्तः शब्दः । किन्तु वैयाकरणसम्प्रदाये सर्वत्राङ्गीक्रियते ।
- संहितायां सत्यां क्वचिद् वर्णव्यत्ययः सम्भवति, स एव सन्धिः ।

# संहिता

ॐ परः सन्निकर्षः संहिता । वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ।

संहितैकपदे नित्या नित्या धातूपसर्गयोः ।

नित्या समासे, वाक्ये तु सा विवक्षामपेक्षते ॥

- यत्र संहिता नित्या, तत्र सन्धिरपि नित्य एव ।
- एकपदे – राम+आत् = रामात् ।
- धातूपसर्गयोः – उप+एति = उपैति ।
- समासे – दैत्य+अरिः = दैत्यारिः ।
- यत्र संहिता विवक्षाश्रिता, तत्र सन्धिरपि वैकल्पिकः ।
- इति+अपि = इत्यपि / इति अपि ।

# सन्धिकार्याणि

- सन्धिकार्यं त्रिविधम् –
  1. आदेशः
  2. आगमः
  3. लोपः

- आदेशाः – इको यणचि, आद्गुणः ।
- सुधी+उपास्यः - सुध्युपास्यः (ईकारस्य स्थाने यकारः आदेशः)
- रमा+ईशः – रमेशः (आकार-ईकारयोः स्थाने एकारः आदेशः)

- आगमाः – ङमो ह्रस्वादचि ङमुण् नित्यम् , ङ्णोः कुक्-टुक् शरि ।
- सन्+अच्युतः = सन्नच्युतः (नकारागमः)
- प्राङ्+षष्ठः = प्राङ्क्षष्ठः (ककारागमः)

- लोपः – लोपः शाकल्यस्य ।
- हरय्+एहि = हर एहि (यकारलोपः)

# पञ्चसन्धिप्रकरणम्

- अच्सन्धिः
- प्रकृतिभावः
- हल्सन्धिः
- विसर्गसन्धिः
- स्वादिसन्धिः

# ४७. इको यणचि (६.१.७७)

- पदत्रयम् । इकः, यण्, अचि ।
- 'संहितायाम्' (६.१.७२) इत्यधिकारः ।
- इकः – षष्ठी = इकः स्थाने (षष्ठी स्थानेयोगा)
- यण् – प्रथमा = विधेयः = यण् स्यात्
- अचि – सप्तमी = अचि परे (तस्मिन्निति निर्दिष्टे पूर्वस्य) ।
- इकः स्थाने यण् स्यात् अचि परे ।
- इकः स्थाने यण् स्यादचि संहितायां विषये ।

- इक् – इ(१८), उ(१८), ऋ (१८), ऌ (१२)
- यण् – य्, व्, र्, ल्
- अच् – अ(१८), इ(१८), उ(१८), ऋ (१८), ऌ (१२), ए(१२), ओ(१२), ऐ(१२), औ(१२)

- इक्+अच् = यण्+अच्

## स्थानत आन्तर्यादीकारस्य यकारः ।

स्थानेऽन्तरतमः

| | | |
|---|---|---|
| इ – तालु | य् – तालु | (इ-चु-य-शानां तालु) |
| उ – ओष्ठौ | व् – दन्तोष्ठम् | (उ-पु-उपध्मानीयानाम् ओष्ठौ) |
| ऋ – मूर्धा | र् – मूर्धा | (ऋ-टु-र-षाणां मूर्धा) |
| ऌ – दन्ताः | ऌ – दन्ताः | (ऌ-तु-ल-सानां दन्ताः) |

सुधी + उपास्यः

सुध् ई + उ पास्यः

इक् + अच्

सुध् य् + उ पास्यः

# ४८. अनचि च (८.४.४७)

- पदद्वयम् ।
- ’यरोऽनुनासिकेऽनुनासिको वा(८.४.४५)’ इत्यतः ’यरः’ ’वा’ इति, ’अचो रहाभ्यां द्वे (८.४.४६)’ इत्यतः ’अचः’, ’द्वे’ इति च अनुवर्तते ।
- अचः – पञ्चमी = अचः परस्य (तस्मादित्युत्तरस्य)
- यरः – षष्ठी = यरः स्थाने (षष्ठी स्थानेयोगा)
- द्वे – प्रथमा = विधेयः = द्वे स्याताम्
- अनचि – न अचि - सप्तमी = अचि परे न
- अचः परस्य यरः द्वे वा स्तः, न तु अचि ।
- इति धकारस्य द्वित्वम् ।

## सुध्य् उपास्यः

| | | | | | | |
|---|---|---|---|---|---|---|
| स् | उ | | ध् | य् | उ | पास्यः |
| | अच् | | यर् | न अच् | | |
| स् | उ | | ध् ध् | य् | उ | पास्यः |

# ४९. स्थानिवदादेशोऽनल्विधौ (१.१.५६)

- त्रीणि पदानि । स्थानिवद्, आदेशः, अनल्विधौ ।
- आदेशः स्थानिवत्स्यात्, न तु स्थान्यलाश्रयविधौ ।

- राम ङे
- राम य ('ङेर्यः' इति सूत्रेण य-आदेशः)

  'सुपि च' इति दीर्घः कर्तव्यः । किन्तु 'य' इत्यस्य सुप्त्वं नास्ति ।

  तदा आदेशः = यादेशः, स्थानिवत्=ङेवत् स्यात् इत्यनेन तस्यापि सुप्त्वे
- रामाय ।

- दिव् स्
- दि औ स् ('दिव औत्' इति सूत्रेण औकारादेशः)
- औकारस्य स्थानिवद्भावेन वकारत्वे 'हल्-ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण सुप्रत्ययस्य लोपः प्राप्नोति ।
- अत एव 'स्थानिवदादेशः अनल्विधौ' इत्युक्तम् । यत्र स्थानी 'अल्' (=एकः वर्णः) भवति, तमाश्रित्य च कार्यं कर्तव्यम्, तत्र स्थानिवद्भावो न ।
- अत्र स्थानी=वकारः, स च अल्, तं वकारमाश्रित्य सुलोपः करणीयः । तस्मादत्र स्थानिवद्भावो नास्ति । सुलोपो न भवति ।